वाराहीनामसहस्रम्

४४७६

[illegible]

[illegible]

बासही सफलभूनाम

वदेले श्रीसरकारीदे

वा·स· ॐ श्रीगणेशाय नमः ॥ देव्युवाच ॥ श्रीकंठ करुणासिंधो दी
१ नबंधो जगत्पते भूतिभूषित सर्वांग परात्परतर प्रभो १
कृतांजलि पुटा भीता पृच्छाम्येकं दयानिधे : आद्या या चि
त्स्वरूपा या निर्विकारा निरंजना २ बोधातीता ज्ञानगम्या
कूटस्थानंदविग्रहा अग्राह्यातींद्रिया शुद्धा निरीहा स्वा
वभासिका ३ गुणातीता निष्प्रपंचा ह्यवाङ्मनसगोचरा च
प्रकृतिर्जगदुत्पत्तिस्थिति संहारकारिणी ४ रणार्थं जग
तो देव कार्यार्थं वा सुरद्विषां नाशाय धत्से सा देहं तत्तत्का
र्यैकसाधकं ५ तत्र भूधरणाद्यायप्रपंचविस्तार हेतवे
विद्युत्केश हिरण्याक्ष बलाकादि वधाय च ६ आविर्भू
तया शक्ति घोरा भूदारुरूपिणी वाराही विकटाकारा दानवा
सुरनाशिनी ७ सद्यः सिद्धिकरी देवी घोराद्घोरतरा शिवा

१ एम

तस्याः सहस्रनामाख्यं स्तोत्रं मे समुदीरय ८ कृपालेशोऽस्ति मयि चेज्ज्ञाग्यं मे यदि वा भवेत् अनुग्राह्यो यद्यहं स्यां तदा वद दयानिधे ९ ईश्वर उवाच साधु साधु वरारोहे धन्या बहुमतासि मे शुश्रूषया समुत्पन्ना भक्तिः श्रवित्ता नव १० सहस्रनाम वाराह्याः सर्वसिद्धिविधायिनः तव चेन्नप्रवक्ष्यामि कस्यान्यस्य वदाम्यहं ११ किंतु गोप्यं प्रयत्नेन संरक्ष्यं प्राणतोऽपि च विशेषतः कलियुगे न देयं यस्य कस्यचित् १२ सर्वेऽन्यथा सिद्धिभाजो भविष्यन्ति वरानने ॥ ॐ अस्य श्रीवाराहीसहस्रनामस्तोत्रस्य महादेव ऋषिरनुष्टुप् छंदः वाराही देवता ग्लौं बीजं क्रौं शक्तिः हुं कीलकं मम सर्वसिद्ध्यर्थे जपे विनियोगः ॥ ॐ वाराही वामनी वामा बगला वासवी वसुः वैदेही वीरसूर्बाला वरदा वि

वा॰स॰
२

सुवल्लभा १३ वंदिता वसुदा वल्या ख्याता सा वंचनी वला वसु
धरा वीति होत्रा वीतरागा विहायसी १४ खर्वा खनित्रिया का
म्या वत्मला कांचनी रम्भा १५ म्या कपालिनी वामा कुरुकुल्या
कलावती १५ यामा याम्येयी धरा धन्या धमनी ध्यानिनी ध्रुवा
धृतिर्लक्ष्मीर्जया तुष्टिः शक्तिर्मेधा तपस्विनी १६ वेधा दया कृ
पा कांतिः स्वाहा शांतिः क्षमा रतिः लज्जा मतिः स्मृतिर्निद्रा तं
द्रा गौरी शिवा स्वधा १७ चंडी दुर्गा भया भीमा भाषा भामा भामा भ
यानका शूद्रा रामा यशा ऽभीरू भैरवी भंगुरा भटी १८ घुर्घु
रा घोषणा घोरा घातिनी घोणसंयुता घना घना घर्घरा च
घट्टणा युक्ता घनाघिनी १९ सर्वाग्रा यायी या तु या या म्या व य
सुत्तर वारुणी ऐरावती स्थिता च दृढ दाम्रवामगा
२० हन्ता भिवृहत्सरधा अर्कवर्गी पाताल भूमिगा २०

रा॰म॰
२

श्री ह्रीः कीर्तिर्गतिः प्रीतिर्धीर्गीः कोशात्मपावया ऋग्यजुः
साम रूपा च परा पोत्रिणी कुरुंवरा २१ गदासिशक्तिचापेषु
शूलचक्रर्ष्टिधारिणी जरती युवती बाला चतुरंगबलो
त्कटा २२ सत्याक्षरा निधिर्नेत्री धात्री पोत्री परा पटुः क्षेत्र
ज्ञा कंपिनी ज्येष्ठा दुराधर्षा धुरंधरा २३ मालिनी मानि
नी माता माननीया मनस्विनी महोत्कटा मन्युकरी मनु
रूपा मनोजवा २४ मेदस्विनी मद्यरता मधुपी मंगलाम
रा मायाऽमनाऽमयहरी मृडानी महिला मतिः २५
महादेवी मोहहरी मंजुर्मृत्युंजयाऽमला मांसलाऽमा
नवाऽमूला महारात्रिर्मदालसा २६ मृगांका मेनका मा
न्या महिषघ्नी मदंतिका मूर्छा मोहमृषा मोक्षा मदमु
स्मुर्मला पहा २७ सिंहर्क्षमहिषव्याघ्रमृगक्रोडानना

धुनी धोरणी धारिणी धेनुर्धरित्री धावनी धवा २८ धर्मध्व
जा ध्यानगम्या धनधान्यधरा वदा पापदैन्यरिपुव्याधिना
शिनी सिद्धिदायिनी २९ कलाकाष्ठास्वरूपा पतारस्तुरिस्वा
सरूपिणी समस्त्रमुभुजा रौद्री राधाराधारमारणिः ३०
रामारतिप्रिया रुष्टा रक्तिणी रविमध्यगा रजनी रमणी
रेवा रंकिणी रंजनी रथ्यिः ३१ रोधा रोधवती रक्ताकारीण
रजनीरता रक्तारूपवती रम्या रुद्राणी रणपंडिता ३२
गंगा च यमुना सरस्वती च सरयूर्मधुः गंडकी तुंगभद्रा च
कावेरी कौशिकी पटुः ३३ खट्वांगिनी सदाचारा सहस्राक्षा
प्रतर्दना सर्वसाशोककरी शस्त्री जटाधारिणपयोरदा ३४
पावनी सौरभी कुब्जा वक्रतुंडा वधोद्यता चंद्रापीडा वेदवेद्या
सर्पिणी नीललोहिता ३५ ध्यानातीता परिच्छेद्या मृत्युरूपा

त्रिवर्गदा ऽप्ररूपा बहुरूपा च नानारूपाऽसितानना ३६ वृषा
कपिर्वृषारूढा वृषेशी वृषवाहना वृषप्रिया वृषावर्त्ता वृ
षपर्वा वृषाकृतिः ३७ कोदंडिनी नागचूडा चक्षुष्या पार
मार्थिका दुर्वासा दुर्गहा देवी दुरावासा दुरारिहा ३८ दुर्गा
युधा दुःखहंत्री दुराराध्या दवीयसी दुरावासा दुष्प्रसहा दुष्प्र
कंपा दुरूहिणी ३९ सुकेशी श्रमणी श्यामा मृगव्याधार्क
तापिनी उग्रा तार्क्षी पाशुपती कौणपी कुणपाशना ४०
कपर्दिनी कामगमा कमनीया कलोज्ज्वला कासारा कनकाभा
च कंचुकंदीहृता गमा ४१ कर्कशा कारणं कांता कल्पाक
ल्पांतकानका श्मशाननिलया निम्ना गजारूढा गजापहा
४२ भस्मप्रिया भस्मशया स्वर्भानुः कालवंचनी शाखावि
शाखायोगोशिखा सुशाखा खोषवर्द्धिनी ४३ खंगमंगारगा

बा॰स॰ नेत्रा नीलांगाऽ नेत्ररूपिणी सांगोपांगाच सारंगा तुरंगा रंगरं
४ गिनी ४४ भद्रा सुभद्रा भद्राली सैंहिकी विनिताऽदितिः हृद्यग
द्यासुपद्या च गद्यपद्यप्रिया प्रसूः ४५ चर्चिका भोगवत्यंबा सा
रसी शबरी नटी योगिनी पुष्कलानंता सा ऽऽ संख्या शचीसती ४६
निम्नगा निम्ननाभिश्च सहिष्णुर्जगती लिपिः दमयंती दमोदं
डी दंडिनी दारदायिका दीपिनी द्रवनी दात्री दत्त कन्या दरीदरात्
दाहिनी द्रविनी दर्वी दंडिनी दंडनायिका ४८ दानप्रिया दोषहं
त्री दुःखदारिद्र्यनाशिनी दोषहा दोषसद्दोग्ध्री दोहदी देविकाऽ
दना ४९ दर्वीकरी दुर्ललिता दोर्युग्माऽ द्वयवादिनी चराचराऽनं
तवृष्टिरुन्मत्ता काम लालसा ५० तारिणी तारिका तारा परमा
त्मा ब्जलोचना इंदुर्हिरण्यकवचा व्यवस्था व्यवसायिका ५१
तीव्रानंदा नदी नाम्नी याकिणी सर्पिणी वरी सुधा सुरा विश्वस

राम
४

हासुवीरां गदधारिणी ५२ जननी प्रीतिपा केरः शाश्वाती सं
संविदुत्तरा ग्रमेयारिष्ट मथनी पिंगलालिंग धारिणी ५३
चांमुडा ह्लावनी हाल्व दृहज्योति रुरुकर्मः सुप्रनीकाव
मुगी वाक्ष्य वाहाप्रलापिनी ५४ नभस्तामाधवीज्यैष्टी शि
शिराज्वालिनी रुचिः शुक्लाशुक्रा शुष्काऽशोकाशुकी भेकी
पिकीवकी ५५ वृषध्वानभोयोनिं सुप्रतीकाविभावरी ग
र्विताग्रर्विणीगम्यागुरुरुगुरु नरीगया ५६ गंधर्वीगणिकांउ
जागारुडी गोपिकाग्रगा गणेशीगामिनी गंतागोपति र्गंधि
नीगवी ५७ गर्जिता गानवी गोना गोरक्षा गोविदां गतिः
ग्रांथिकीग्रंथिक न्गोष्ठी गर्भरूपा गुणैषिणी ५८ पारस्करापांच
नदावहुरूपा विरूपिका ऊहान्हाडुरुहाच संमोहा मो
हहारिणी ५९ यज्ञविग्रहिणी यज्ञा यजरूपा यशस्विनी

अग्निष्टोमोऽत्यग्निष्टोमो वाजपेयश्च षोडशी ६० पुंडरीकोऽश्वमेध
श्च राजसूयश्च नाभसी स्विष्टकृद्वसुः सौवर्णो गोसवश्च महा
व्रता ६१ विश्वजिद्ब्रह्मयज्ञश्च प्राजापत्यः शिलायवः अश्व
क्रान्तारथक्रान्ता विष्णुक्रान्ता विभावसुः ६२ सूर्यक्रान्ता गज
क्रान्ता बलभिन्नागयज्ञका सावित्री च र्धसावित्री सर्वतो
भद्रकारुणी ६३ आदित्यामयगोदोह गवामयमृगामया
सर्पामयः कालपिञ्जः कौण्डपायनकाह्लौ ६४ अग्नि
चिद्द्वादशाहश्चोपांशुसोमाविदोहनः अश्वप्रतिग्रहो बर्हि
रथोऽभ्युदयऋक्काविराट् ६५ सर्वस्वदक्षिणोदीक्षा सोमाख्यः
समिदाहुयः कठायनश्च गोदोहः स्वाहाकारस्तनूनपात् ६
६ ऽपुरुषमेधश्च श्येनो वज्रवपुर्यमः अंगिराः कंकभेरुंड
चारायणप्रायणो ६७ ज्योतिष्टोमः कुहूर्दर्शो नंदाख्यः पौ

ण्मासिकः गजप्रतिग्रहो रात्रिः सोमरः प्राकलायनः
६८ सौभाग्यकृत्ककारी बोवैदलायन रामठाः एोचिप्राप्ती
नाचिकेतः शांतिकृत् पुष्टिकृत्तथा ६९ वैनतेयोच्चाटनैश्च
वशीकरणमारणो त्रैलोक्यमोहनो वीरः कंदर्प्पबलशातनः
७० शंखचूडो गजध्यायो रौद्रारव्यो विष्णुविक्रमः श्रौषट्
वौषड्वषट्कारः पाकसंस्था परिष्कृती ७१ चयनो नरमे
धश्च कारीरी रत्नहारिका सौत्रामणीच भारुंडा वार्हस्पत्यो
वलंगमः ७२ प्रचेताः सर्व्वसत्रश्च गजमेधः करंभरः हविः
संस्था सोमसंस्था पाकसंस्था गरुत्मनी ७३ स्फ्या सूर्पश्चम
सः स्रुक् स्रुच स्रुवो लूखलमेदनी चषालोमयानीमेटीयूपः
प्राग्वंशा कुचिका ७४ रश्मिः स्तश्वदास्पश्च वारुणो दोहदः
कुयाग्यंतर्यामो द्रोणकल सौमैत्रावरुण ग्राश्विनः ७५

वा.स. पत्नी तत्रभ्रमंपीचहारियोजनएवच प्रतिप्रस्थानस्तुकौचसामि
६ धेनीसमित्समा ७६ होताऽध्वर्युस्तथोजातोनेतात्वष्टाचणो
त्रिका ग्नाग्नीध्रोऽच्छावाकएवग्रावस्तु प्रतिहर्त्रकः ७७ सुब्र
ह्मण्योब्राह्मणाछंसी ब्रह्मामैत्रवारुणः श्रन्नेता प्रतिप्रस्था
ताः यजमानोऽद्भुचित्रिका ७८ ग्नामित्ताष्ठषदाज्यंसाहव्यंक
व्यंचरुपयः जुहूर्ध्रुवोपभृद्भुलाक्षयीत्रेतातरस्विनी ७९
पुरोडाशः पशुकर्मश्च प्रातर्ली ब्रह्मयज्ञिमी ग्नग्निजिह्वा
दर्भरोमा ब्रह्मशीर्षामहोदरी ८० ग्नमृतप्राशिकानारायणी
नग्नादिगंबरा ओंकारिणीचतुर्वेदमयीश्रुतिरणुल्वणा ८१
प्रह्लादद्रागुञ्जारभासन्त्यागगनचारिणी भीमवक्त्रामहा
वक्त्राकिर्मीराहृष्टपिंगला ८२ रुष्टमर्हामहामर्द्दाघोर
मर्द्दामयाननाघोराननाघोरजिह्वाघोररावामहाव्रता ८३

राम
६

दीप्तास्यादीप्तनेत्रा च चंद्रचूडा हरएणा जटी सुरभी सौरभेयी चक्षा
या संध्या च मां सत्ता ८४ हृष्मा हंसा वराहकपुश्करजी कृष्ण
वल्लभा त्रासिनी मोहनी द्वेषा मृत्युरूपा भयावहा ८५ भीषणा
दानवेंद्रघ्नी कल्पकर्त्री क्षयंकरी अभया पृथिवी साध्वी के
शिनी व्याधिजन्महा ८६ अक्षोभ्या ह्लादिनी कल्पा पवित्रा रो
पिली शुभा कन्यादेवी सुरादेवी भीमादेवी मदंतिका ८७ शाकं
भरी महाश्वेता धूम्रा धूम्रेश्वरी ईश्वरी वीरभद्रा महाभद्रा महा
देवी महासुरी ८८ श्मशानवासिनी दीप्ता चितिसंस्था चिति
प्रिया कपालहस्ता खट्वांगी खड्गिनी शूलिनी हली ८९ कांता
रिणी महायोगा योगमार्गा युगाग्रहा धूम्रकेतुर्महाहस्या
युगानां परिवर्तिनी ९० अंगारिण्यंकुशकरी घंटा कर्णी
चचर्किणी वेताली ब्रह्मवेताली महावेतालिका तथा ९१

वा.स.

विद्याराज्ञी मोहराज्ञी महामोहा महोदरी अतंमव्यंमविष्णुं च
सांख्ययोगस्वरूपोद्गमः ९२ अध्यात्मं चाधिदैवं च चाधिभूतं श
मएव च घोरारवा विरूपाक्षी शिखिपिञ्छध्वजप्रिया ९३
शंखचक्रगदाहस्ता महिषासुरमर्दिनी मातंगी मत्तमातंगी
कौशिकी ब्रह्मवादिनी ९४ उग्रतेजाः सिद्धसेना जृंभणी मो
हिनी तथा जया च विजया चैव विनिता वक्रुरे वच ९५ धात्री
विधात्री विक्रान्ता धृष्टा मूर्छा च मूर्छनी दमनी दामिनी दा
म्या छेदिनी तापिनी तपी ९६ बंधिनी बाधिनी वध्या बोधा
नीता बुधप्रिया हरिणी हारिणी हंत्री धारिणी धारिणी धारा ९७
विसंभनी संधिनी च संध्या संधिप्रिया महा रेवती कालक
र्णी च सिद्धिर्लक्ष्मीररुंधती ९८ धर्मप्रिया धर्मरता धर्मिष्ठा धर्म
चारिणी व्युष्टिः ख्यातिः सिनीवाली कुहूरनुमतिर्धृतिः ९९

राम

त्वाष्ट्री वैरोचनी मैत्री नीरजा कैटभेश्वरी भ्रमणी भ्रामणी भ्रा
मा भ्रमरी भ्रामरी भ्रमा १०० निष्कला कलहा नीता कौला
कारकलेवरा विद्युज्जिह्वा वल्किलिप्ती हिरण्यपातनिपाति
नी १०१ जितकामा कामगमा कोल्लाकल्याणिनी कला २
प्रधानं तत्परका तारा ताहिता माऽहितभेदिनी दुरत्तरा परं
ब्रह्म महोत्ता नाम हाहवा वारुणी वरुणी वाणी वीणा वेणी त्रि
हंगमा ३ मोदप्रिया मोदकिनी प्लवनी प्लावनी ध्रुतिः अ
जरा लोहिताऽलक्ष्या गतप्रा विश्वभोजिनी ४ मनो बुद्धिर
हंकारः क्षेत्रसंः क्षेत्रपालिका चतुर्वेदा चतुर्भगा चतुरंगा
चरुप्रिया ५ चर्विणी चोरिणी चारी चांगेरी चर्मचारिणी नि
र्लेपा निष्प्रपंचा च प्रशांता नित्यविग्रहा ६ स्तव्या स्तवप्रिया व्या
ला गुरुराश्रितवत्सला निष्कलंका निरालंबा निर्द्वंद्वा निष्परि

वा.स. ग्रहा ७ निर्गुणा निर्मला नित्या निरीहा निरघा नवा निरिंद्रि
या निराभासा निर्मोहा नीतिनायिका ८ निरिंधना निष्कला च
लीलाकारा निरामया मुंडा विरूपा विरूता पिंगला स्त्रीगुणोत्त
रा ९ पद्मगर्भा महागर्भा विश्वगर्भा विलक्षणा परमात्मा परे
शानी परा ऽपारा परंतपा १० संसारसेतुः क्रूराक्षी मूढा मग्ना
मनुप्रिया विस्मया दुर्जया दक्षा तनुहंत्री दवानला ११ परब्र
ह्मानंदरूपा सर्वसिद्धिविधायिनी एवमुक्ता मरा तत्रा न्मयोद्यत
प्रकाशितं १२ गोपनीयं प्रयत्नेन नाख्येयं यस्य कस्यचित् यदी
च्छसि प्रिये सिद्धिमैश्वर्यं चिरजीवितां १३ आरोग्यं नृपसंमा
नदानान्यस्य कीर्तयेत् नाम्नां सहस्रं वाराह्या मया ते समुदीरि
तं १४ यः पठेत् शृणुयाद्वापि सर्वपापैः प्रमुच्यते अश्वमेधस
हस्रस्य राजसूयशतस्य च १५ पुंडरीकायुतस्यापि फलपाकः

राम

प्रजायते यतः सर्वभावेन सर्वास्तु सिद्धयः करे १६ जाय
ते महदैश्वर्य्यं सर्वं यद्यपि नो भवेत् धनं सारयते वह्निरगा
धोब्धिः फलायते १७ सिद्धयश्च तृणायंते विषमप्यमृतायं
ते हारायंते महासर्प्पाः सिंहः क्रीडामृगायते १८ दासायंते
महीपाला जगन्मित्रायतेऽखिलं तस्मान्नाम्नां सहस्रेण स्तु
ता सा जगदंबिका १९ प्रयत्यखिलान् कामान् देहांते परमां गतिं
इदं पर्वमधीयानो दौष्यंतिर्भरतः श्रिये २० जिगाय पृथिवीं सर्वां
रथेनैकेन षड्भिर्नात् आजहाराश्वमेधानां सहस्रं द्वितयन्नृपः
२१ एवं कस्मिन्नश्वमेधे गुरवे दक्षिणीकृते सहस्रं यत्र पद्मा
नां कण्वाय भरतो ददौ २२ पंचलक्षाणि वर्षाणां बुभुजे मेदि
नीं पुरा पंचाशीति सहस्राणि भार्याणां तस्य चाभवन् २३ मांधा
तृप्रमुखाश्चान्ये नृपाः सिद्धिं प्रपेदिरे उद्दालकप्रभृतयो मुनय

वा.स.
९ 9

श्रवणान्नेन २४ गुरौ किं तु प्रकर्त्तव्या भक्तिर व्यभिचारिणी गुरु
भक्तिमृते नैव सिध्यतीति निवेदितं २५ यथा देवे तथा मंत्रे य
था मंत्रे तथा गुरौ भक्तिः कार्या निष्कपटा सद्यः सिद्धिमभीप्सता
२६ एतत्सर्वमशेषेण समासात्कथितं तव गोप्यं प्रयत्नतस्तत्र
प्रमाणं वचनं मम २७ ध्येयाऽरूपा च वाराहीपठं नाम सहस्रकं
सर्वसिद्धिकरे कार्य्यां सत्यं सत्यं निवेदितं १२८ नमो भगवत्यै
नमो नारायण्यै च ॥ इति श्री उड्डामरतंत्रे देवदेवीसंवादे वा
राहीसहस्रनामस्तोत्रं संपूर्णम् शुभमस्तु संवत् १९३६ वै
शाखशुक्ल पंचम्यां शुक्रे पुनर्वसौ गं ३ ज्येष्ठप्रविष्टे २ श्रीकर्म
चंद चौधरी सुधासरनिवासिने नदात्मज जोतसी राधाकृष्ण दत्ते
श्री सेठलाल वाउत लिखित्वा समर्प्पितमिदं वाराहीसहस्रनाम
श्रीरघुनाथमंदिरे श्रीमहाराजानां पुस्तकालये निहालचंद गण
पति हसो काशी विश्वेश्वराय नमः ॥ जंबूराजधान्यां जन्मसंवत्सरः राम
नेसद प्रमाणं

९